শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদধ্যাত্মরামাযণে অরণ্যকাণ্ডে জটাযু কৃতং

# ॥ শ্রীরামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামস্তোত্রম্ ॥

অগণিতগুণমপ্রমেযমাদ্যং
    সকলজগৎস্থিতিসংযমাদিহেতুম্।
উপরমপরমং পরাত্মভূতং
    সততমহং প্রণতোঽস্মি রামচন্দ্রম্॥ **1** ॥

নিরৱধিসুখমিন্দিরাকটাক্ষ -
    ক্ষপিতসুরেন্দ্রচতুর্মুখাদিদুঃখম্।
নরৱরমনিশং নতোঽস্মি রামং
    ৱরদমহং ৱরচাপবাণহস্তম্॥ **2** ॥

ত্রিভুৱনকমনীযরূপমীড্যং
    রৱিশতভাসুরমীহিতপ্রদানম্।
শরণদমনিশং সুরাগমূলে
    কৃতনিলযং রঘুনন্দনং প্রপদ্যে॥ **3** ॥

ভৱৱিপিনদৱাগ্নিনামধেযং
    ভৱমুখদৈৱতদৈৱতং দযালুম্।
দনুজপতিসহস্রকোটিনাশং
    রৱিতনযাসদৃশং হরিং প্রপদ্যে॥ **4** ॥

অৱিরতভৱভাৱনাতিদূরং
    ভৱৱিমুখৈর্মুনিভিঃ সদৈৱ দৃশ্যম্।
ভৱজলধিসুতারণাঙ্ঘ্রিপোতং
    শরণমহং রঘুনন্দনং প্রপদ্যে॥ **5** ॥

গিরিশগিরিসুতামনোনিৱাসং
গিরিৱরধারিণমীহিতাভিরামম্।
সুরৱরদনুজেন্দ্রসেৱিতাঙ্ঘ্রিং
সুরৱরদং রঘুনাযকং প্রপদ্যে॥ **6**॥

পরধনপরদারৱর্জিতানাং
পরগুণভূতিষু তুষ্টমানসানাম্।
পরহিতনিরতাত্মনাং সুসেৱ্যং
রঘুৱরমম্বুজলোচনং প্রপদ্যে॥ **7**॥

স্মিতরুচিরৱিকাসিতাননাব্জ -
মতিসুলভং সুররাজনীলনীলম্।
সিতজলরুহচারুনেত্রশোভং
রঘুপতিমীশগুরোর্গুরুং প্রপদ্যে॥ **8**॥

হরিকমলজশম্ভুরূপভেদা -
ত্ত্বমিহ ৱিভাসি গুণত্রযানুৱৃত্তঃ।
রৱিরিৱ জলপূরিতোদপাত্রে -
ষ্ৱমরপতিস্তুতিপাত্রমীশমীডে॥ **9**॥

রতিপতিশতকোটিসুন্দরাঙ্গং
শতপথগোচরভাৱনাৱিদূরম্।
যতিপতিহৃদযে সদা ৱিভাতং
রঘুপতিমার্তিহরং প্রভুং প্রপদ্যে॥ **10**॥

ইত্যেৱং স্তুৱতস্তস্য প্রসন্নোঽভূদ্রঘূত্তমঃ।
উৱাচ গচ্ছ ভদ্রং তে মম ৱিষ্ণোঃ পরং পদম্॥ **11**॥

শৃণোতি য ইদং স্তোত্রং লিখেদ্বা নিযতঃ পঠেৎ।
স যাতি মম সারূপ্যং মরণে মৎস্মৃতিং লভেৎ॥ **12**॥

ইতি রাঘৱভাষিতং তদা
    শ্রুতৱান্ হর্ষসমাকুলো দ্বিজঃ।
রঘুনন্দনসাম্যমাস্থিতঃ
    প্রযযৌ ব্রহ্মসুপূজিতং পদম্॥ **13**॥

॥ শ্রীরামস্তোত্রং সমাপ্তম্॥